पाठ–25

# ध्रुवोपाख्यानम्

पुरा उत्तानपादो नाम राजा आसीत्। तस्य द्वे पत्न्यौ आस्ताम्– सुनीतिः सुरुचिश्च। सुनीतिः ज्येष्ठा पत्नी आसीत्, सुरुचिः तु कनिष्ठा आसीत्। सुरुचिः पत्युः अतीव प्रियासीत्। सुनीतेः पुत्रस्य नाम ध्रुवः सुरुचेः पुत्रस्य च नाम उत्तमः आसीत्। तयोः सुरुचेः पुत्रः उत्तमः नृपस्य प्रियतरः आसीत्।

एकदा राज्ञः उत्तानपादस्य क्रोडे उत्तमः आसीनः आसीत्। उत्तमं दृष्ट्वा ध्रुवस्यापि इच्छा पितुः अङ्कम् आरोढुं सञ्जाता। किन्तु तत्र स्थिता विमाता सुरुचिः तं न्यवारयत् अवदत् च– कुमार! त्वं पितुः अङ्कमारोढुं योग्यः नासि यतो हि त्वं मम पुत्रः नासि। मम पुत्र एव अस्य योग्यः।

विमात्रा अनादृतः ध्रुवः दुःखितः अभवत्। असौ स्वमातुः सुनीतेः समीपम् अगच्छत्। तं दुःखितं दृष्ट्वा सुनीतिः दुःखस्य कारणम् अपृच्छत्। ध्रुवः सर्वं वृत्तान्तम् अकथयत्। पुत्रस्य वचनं श्रुत्वा सुनीतिः अवदत्– पुत्र! तव विमाता सत्यं वदति। तथापि दुःखितः मा भव। तपसा पितुरङ्कं लभस्व। वनं गच्छ, भक्तवत्सलं भगवन्तं सेवस्व इति। अम्ब, भक्तवत्सलं भगवन्तं सेविष्ये अभीष्टं च प्राप्स्यामि इत्युक्त्वा मातरं प्रणम्य च पञ्चवर्षीयः बालकः ध्रुवः तपोवनम् अगच्छत्। मार्गे देवर्षिः नारदः तम् अपृच्छत्– वत्स, त्वं कुत्र किमर्थञ्च गच्छसि? ध्रुवोऽवदत्– भगवन्, तपसा भगवन्तं तोषयितुं वनं गच्छामि। अहम् ऐश्वर्यं राज्यसुखानि वा न अभीप्सामि। अहं पितुरङ्कम् इच्छामि। कृपया तपोमार्गम् उपदिशतु भवान्। ध्रुवस्य दृढं निश्चयं दृष्ट्वा देवर्षिः नारदः अवदत्– वत्स, यमुनातटस्थितं मधुसंज्ञं वनं गच्छ, तत्र वासुदेवम् आराधय। हरिः एव तव मनोरथं पूरयिष्यति। इत्युक्त्वा नारदः ततोऽगच्छत्।

अथ ध्रुवः मधुकाननं प्राप्य विष्णुं ध्यातुम् आरब्धवान्। प्रथमं तु अनेके देवाः इन्द्रेण सह तस्य ध्यानभङ्गं कर्तुं प्रयासमकुर्वन्। किन्तु सर्वे ते विफलप्रयत्नाः जाताः। षट् मासानन्तरं ध्रुवस्य तपसः भीताः विष्णोः समीपमयच्छन् अवदन् च– प्रभो, ध्रुवस्य तपसा तप्ताः भीताश्च वयं त्वां

शरणमागताः। तं तपसः निवर्तय इति। हरिः अवदत्– सुराः ध्रुवः इन्द्रत्वं धनाधिक्यं वा नेच्छति। भवन्तः स्वस्थानं गच्छत" इति। तदनन्तरं श्रीहरिः ध्रुवस्य पुरः आविरभवत् तं करेण अस्पृशत् च। श्रीहरिः अवदत्– पुत्र, वरं वरय। ध्रुवोऽवदत्– भगवन्, मे तपसा यदि परमं तोषं गतोऽसि तदा मे प्रज्ञां देहि पितुरङ्कञ्च प्रयच्छ। सन्तुष्टः हरिः तस्मै प्रज्ञां दुर्लभं ध्रुवपदञ्च प्रायच्छत्। गृहं प्रतिनिवृत्तं ध्रुवं प्रति पितुः उत्तानपादस्य विमातुः सुरुचेः च चित्ते निर्मले अभवताम्। इत्थं पञ्चवर्षीयोऽपि बालकः ध्रुवः भगवतः प्रसादात् अचलम् उच्चस्थानम् ध्रुवपदं प्राप्नोत्।

**दृढेन मनसा कार्यं चिन्तयित्वा नरो व्रती।**
**कठोरतपसा सिद्धिं लभते नात्र संशयः॥**

## अभ्यासः

1. ध्रुवोपाख्यानं कां शिक्षां ददाति?
2. स्वदृढनिश्चयेन पञ्चवर्षीयः ध्रुवः किं लब्धवान्?
3. सुरुचेः पुत्रः कः आसीत्? सुनीतेः पुत्रः कः आसीत्?

★★★

S.C.E.R.T. LIBRARY BIHAR, PATNA 20424